# Apadastotram

# આપાદસ્તોત્રમ્

## Document Information

Text title : Apada Stotram

File name : ApAdastotram.itx

Category : vishhnu, vAdirAja, vishnu, stotra

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Malathi Shekar, Revathy R.

Latest update : May 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 7, 2024

*sanskritdocuments.org*

# આપાદસ્તોત્રમ્

મધ્વાદૃતં રજતપીઠપુરાધિવાસં
હૃદ્યં મુદેऽસ્તુ મુરમર્દનપાદપદ્મમ્ ।
સદ્યોऽભિજાતસુસરોજનવાવભાસ-
સ્પર્ધિપ્રભાવિભવદીપિતદિક્પ્રદેશમ્ ॥ ૧॥

ઉદ્યન્નખેન્દુરુદયં હૃદિ નસ્તનોતુ
મધ્વાગમોત્સવમહાઙ્કુરપોષહેતુઃ ।
પદ્મોપરિસ્ફુરિતમૌક્તિકચારુભાવ-
પ્રદ્વેષ્યઘૌઘતિમિરપ્રશમાય વિષ્ણોઃ ॥ ૨॥

જઙ્ઘાયુગં જનયતુ શ્રિયમન્વહં મે
તુઙ્ગેન્દિરાકરસરોરુહરઙ્ગસઙ્ગિ ।
સઞ્જાતપલ્લવિતચારુલતાપરીત-
સ્તમ્ભોપમાનપરમન્દિરમચ્યુતસ્ય ॥ ૩॥

ઊરુદ્વયં સતતમુચ્ચપદં દદાતુ
શ્રીરુપ્યપીઠનિલયસ્ય હરેર્હરેડ્યમ્ ।
વૃત્તાવલમ્બિકરિપોતમૃદુપ્રપુષ્ટ-
હસ્તદ્વયપ્રતિમમપ્રતિમસ્ય તસ્ય ॥ ૪॥

પીનં હરેરુદરમાદરતસ્સ્મરામિ
જ્ઞાનાત્મકસ્ય નવનીતજગન્નિકેતમ્ ।
આનન્દતીર્થનયનાભિધમીનમાન્ય-
શ્રીનિમ્નનાભિસરસીરુચિરં ચિરં તત્ ॥ ૫॥

વક્ષસ્થલં વિશદહારવિરાજિ વિષ્ણો-
ર્લક્ષ્મીવિશાલગૃહમસ્તુ મમાન્તરઙ્ગમ્ ।
નક્ષત્રરાજિસુવિરાજિનિશેશબિમ્બ-
લક્ષ્યામ્બરોપમમપારગુણામ્બુરાશેઃ ॥ ૬॥

રત્નૌઘચઞ્ચુફણપઞ્ચકભોગિભોગં
સ્વસ્પર્ધિજેતુમિવ દણ્ડસુપાશધારી ।
સત્કઙ્કણાઙ્ગદસુશોભશુભાઙ્ગુલીયં
હસ્તદ્વયં મમ તનોત્વભયં મુરારેઃ ॥ ૭॥

વક્રાલકં વરનસોજ્જ્વલકુણ્ડલાભ્યાં
યુક્તં ત્રિરેખિગલમુન્નતમૌલિબન્ધમ્ ।
વક્ત્રં વિભોર્મધુપમૌક્તિકમત્સ્યસઙ્ઘ-
શૈવાલશાલિકમલદ્યુતિ મેઽક્ષિણ ભૂયાત્ ॥ ૮॥

અમ્લાનપદ્મદલમાત્મરુચાઽનુકુર્વ-
દામ્નાયકોવિદબુધેષ્ટકૃતપ્રચારમ્ ।
રમ્યં વિલોચનયુગં શ્રિતમીક્ષતાં માં
સન્મધ્વપૂજિતપદાબ્જયુગસ્ય તસ્ય ॥ ૯॥

મુગ્ધાનનેન નયનેન કરેણ નાભિ-
ચ્છિદ્રેણ પાદયુગલેન ધૃતાબ્જસામ્યમ્ ।
પદ્માલયોજ્ઝતિ કદાઽપિ ન દેવમેનં
મધ્વપ્રિયં ત્વિતિ કિમત્ર ગિરાં વિચારૈઃ ॥ ૧૦॥

આપાદમા ચ મકુટાન્મુરવૈરિણોઽત્ર
સ્તોત્રં તદેતદનવદ્યમવદ્યજૈત્રમ્ ।
ગોપાલવાજિમુખકિઙ્કરવાદિરાજ-
પ્રોક્તં પઠન્ ભવતિ તત્સદયાક્ષિલક્ષ્યમ્ ॥ ૧૧॥

ઇતિ શ્રીમદ્વાદિરાજયતિપ્રોક્તમાપાદસ્તોત્રં સમ્પૂર્ણમ્ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Malathi Shekar, Revathy R.

*Apadastotram*

pdf was typeset on May 7, 2024

Please send corrections to *sanskrit@cheerful.com*